# nava graha karAvalamba stotram

# નવગ્રહ કરાવલમ્બસ્તોત્રમ્

## Document Information

Text title : nava graha karaavalamba stotram

File name : navagrahakaraa.itx

Category : navagraha, stotra, nava

Location : doc_z_misc_navagraha

Author : Traditional

Transliterated by : P.V.R Narasimha Rao

Proofread by : P.V.R Narasimha Rao

Latest update : August 23, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 14, 2022

*sanskritdocuments.org*

# નવગ્રહ કરાવલમ્બસ્તોત્રમ્

જ્યોતીશ દેવ ભુવનત્રય મૂલશક્તે
    ગોનાથ ભાસુર સુરાદિભિરીઘમાન ।
નૃણાંશ્ચ વીર્ય વર દાયક આદિદેવ
    આદિત્ય વેદ્ય મમ દેહિ કરાવલમ્બમ્ ॥ ૧॥

નક્ષત્રનાથ સુમનોહર શીતલાંશો
    શ્રી ભાર્ગવી પ્રિય સહોદર શ્વેતમૂર્તે ।
ક્ષીરાબ્ધિજાત રજનીકર ચારુશીલ
    શ્રીમચ્છશાંક મમ દેહિ કરાવલમ્બમ્ ॥ ૨॥

રુદ્રાત્મજાત બુધપૂજિત રૌદ્રમૂર્તે
    બ્રહ્મણ્ય મંગલ ધરાત્મજ બુદ્ધિશાલિન્ ।
રોગાર્તિહાર ઋણમોચક બુદ્ધિદાયિન્
    શ્રી ભૂમિજાત મમ દેહિ કરાવલમ્બમ્ ॥ ૩॥

સોમાત્મજાત સુરસેવિત સૌમ્યમૂર્તે
    નારાયણપ્રિય મનોહર દિવ્યકીર્તે ।
ધીપાટવપ્રદ સુપંડિત ચારુભાષિન્
    શ્રી સૌમ્યદેવ મમ દેહિ કરાવલમ્બમ્ ॥ ૪॥

વેદાન્તજ્ઞાન શ્રુતિવાચ્ય વિભાસિતાત્મન્
    બ્રહ્માદિ વન્દિત ગુરો સુર સેવિતાંઘ્રે ।
યોગીશ બ્રહ્મ ગુણ ભૂષિત વિશ્વ યોને
    વાગીશ દેવ મમ દેહિ કરાવલમ્બમ્ ॥ ૫॥

ઉલ્હાસ દાયક કવે ભૃગુવંશજાત
    લક્ષ્મી સહોદર કલાત્મક ભાગ્યદાયિન્ ।
કામાદિરાગકર દૈત્યગુરો સુશીલ
    શ્રી શુક્રદેવ મમ દેહિ કરાવલમ્બમ્ ॥ ૬॥

શુદ્ધાત્મ જ્ઞાન પરિશોભિત કાલરૂપ
    છાયાસુનન્દન યમાગ્રજ ક્રૂરચેષ્ટ ।
કષ્ટાદ્યનિષ્ઠકર ધીવર મન્દગામિન્
    માર્તંડજાત મમ દેહિ કરાવલમ્બમ્ ॥ ૭॥

માર્તંડ પૂર્ણ શશિ મર્દક રૌદ્રવેશ
    સર્પાધિનાથ સુરભીકર દૈત્યજન્મ ।
ગોમેધિકાભરણ ભાસિત ભક્તિદાયિન્
    શ્રી રાહુદેવ મમ દેહિ કરાવલમ્બમ્ ॥ ૮॥

આદિત્ય સોમ પરિપીડક ચિત્રવર્ણ
    હે સિંહિકાતનય વીર ભુજંગ નાથ ।
મન્દસ્ય મુખ્ય સખ ધીવર મુક્તિદાયિન્
    શ્રી કેતુ દેવ મમ દેહિ કરાવલમ્બમ્ ॥ ૯॥

માર્તંડ ચન્દ્ર કુજ સૌમ્ય બૃહસ્પતીનામ્
    શુક્રસ્ય ભાસ્કર સુતસ્ય ચ રાહુ મૂર્તેઃ ।
કેતોશ્ચ યઃ પઠતિ ભૂરિ કરાવલમ્બ
    સ્તોત્રમ્ સ યાતુ સકલાંશ્ચ મનોરથારાન્ ॥ ૧૦॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ૐ તત્ સત્ ॥

Composed by P.V.R Narasimha Rao of http://www.sjvc.net/

*nava graha karAvalamba stotram*

pdf was typeset on September 14, 2022

Please send corrections to *sanskrit@cheerful.com*